ઓં સત્ગુરુભ્યો નમઃ

## કેતુ સ્તોત્ર મહામન્ત્રં

------------------------------------

અસ્ય શ્રી કેતુસ્તોત્ર મહામન્ત્રસ્ય
વામ દેવ ઋષિઃ અનુષ્ટુપ્ છન્દઃ કેતુર્દેવતા
કેતુપ્રસાદ સિદ્ધ્યર્ત્થે જપે વિનિયોગઃ

### ગૌતમ ઉવાચઃ-

મુનીન્દ્ર સુત તત્વજ્ઞ
સર્વ્વ શાસ્ત્રવિશારદઃ
સર્વ્વરોગહરં બ્રૂહિ
કેતોઃ સ્તોત્રમનુત્તમં (1)

### સૂત ઉવાચઃ-

શૃણુગૌતમ વક્ષ્યામિ
સ્તોત્રમેતદનુત્તમં
ગુહ્યાત્ ગુહ્યતમં કેતોઃ
બ્રહ્મણા કીર્ત્તિતં પુરા (2)

આદ્યઃ કરાળવદનો
દ્વિતીયો રકતલોચનઃ
તૃતીય પિંગળાક્ષશ્ચ
ચતુર્ત્થો જ્ઞાનદાયકઃ (3)

પઞ્ચમ કપિલાક્ષશ્ચ
ષષ્ઠઃ કાલાગ્નિસન્નિભઃ
સપ્તમો હિમગર્ભશ્ચ
ધૂમ્રવર્ણણો ટષ્ટમસ્તથા (4)

નવમઃ કૃત્તકણ્ઠશ્ચ
દશમો નરપીડક
એકાદશસ્તુ શ્રીકણ્ઠ
દ્વાદશસ્તુ ગદાયુધઃ (5)

દ્વાદશૈતે મહાક્રૂરાઃ
સર્વ્વોપદ્રવકારકાઃ
પર્વ્વકાલે પીડયન્તિ
દિવાકરનિશાકરૌ (6)

નામદ્વાદશકં સ્તોત્રં
કેતોરેતન્ મહાત્મનઃ
પઠન્તિયે ટ ન્વહં ભક્ત્યા
તેભ્યઃ કેતુઃ પ્રસીદતિ (7)

કુળત્થધાન્યે વિલિખેદ્
ષટ્કોણં મણ્ડલં શુભં
પત્મમષ્ટદળં તત્ર
વિલિખેચ્ચ વિધાનતઃ (8)

નીલં ઘટં ચ સંસ્થાપ્ય
દિવાકર નિશાકરૌ
કેતું ચ તત્ર નિક્ષિપ્ય
પૂજયિત્વા વિધાનતઃ (9)

સ્તોત્રમેતત્ પઠિત્વા ચ
ધ્યાયેત્ કેતું વરપ્રદં
બ્રહ્મણં શ્રોત્રિયં શાન્તં
પૂજયિત્વા કુટુંબિનં (10)

કેતો કરાળવક્ત્રસ્ય
પ્રતિમાં વસ્ત્રસંયુતાં

કુંભાદિભિશ્ચ સંયુક્તાં
ચિત્રાધારે પ્રદાપયેત્ (11)

દાનેનાનેન સુપ્રીતઃ
કેતુઃ સ્યાત્તસ્યસૌખ્યદઃ
વત્સરં પ્રયતોભૂત્વા
પૂજયિત્વા વિધાનતઃ (12)

મૂલમષ્ટોત્તરશતં
યે યજન્તિ નરોત્તમાઃ
દોષં કેતુ પ્રસાદેન
ન કદાચિત્ ભયં ભવેત્ (13)

**શ્રી કેતુસ્તોત્રં સમ્પૂર્ણં**